# शान्तियाष्टक स्तोत्र

न स्नेहाच्छरणं प्रयान्ति भगवन् ! पादद्वयं ते प्रजाः ,
हेतुस्तत्र विचित्रदुःखनिचयः संसारघोरार्णवः |
अत्यन्तस्फुरदुग्ररश्मि निकर व्याकीर्ण भूमण्डलो
ग्रैष्मः कारयतीन्दु पाद सलिलच्छायानुरागंरविः |१|

क्रुध्दाशीविष दष्ट दुर्जय विष ज्वालावली विक्रमो ,
विद्या भेषज मन्त्र तोय हवनै र्याति प्रशान्तिं यथा |
तद् वत्ते चरणारुणाम्बुज युग स्तोत्रोन्मुखानां नृणाम ,
विघ्नाः कायविनायकाश्चसहसाशाम्यन्त्यहोविस्मयः |२|

सन्तप्तोत्तम काञ्चन क्षितिधर श्री स्पर्द्धि गौरद्युते ,
पुंसां त्वच्चरणप्रणाम करणात्पीडाः प्रयान्तिक्षयं |
उद्यद्भास्कर विस्फुरत्कर शतव्याघात निष्कासिता ,
नाना देहि विलोचन – द्युतिहरा शीघ्रं यथा शर्वरी |३|

त्रैलोक्येश्वरभंगलब्धविजयादत्यन्तरौद्रात्मकान् ,
नानाजन्मशतान्तरेषु पुरतो जीवस्य संसारिणः |
को वा प्रस्खलतीह केन विधिना कालोग्रदावानला–
न्न स्याच्चेत्तय पाद्पद्मयुगलस्तुत्यापगायारणम् |४|

लोकालोकनिरन्तरप्रयिततज्ञानैकमूर्ते विभो
नानारत्नपिनद्ध दण्ड रूचिरश्वेतातपत्रत्रय |

त्वत्पाद द्वयपूतगीतरवतः शीघ्रं द्रवन्त्यामयाः
दर्पाध्मातमृगेन्द्रभीमनिननाद्वन्या यथाकुन्जराः |५|

दिव्यस्त्रीनयनाभिराम विपुलश्रीमेरुचूडामणे
भास्वद्बालदिवाकरद्युतिहर प्राणीष्टभामण्डल |
अव्याबाधमचिन्त्यसारमतुलं त्यक्तोपमं शाश्वतम्
सौख्यं त्वच्चरणारविन्दयुगलस्तुत्यैव संप्राप्यते |६|



यावन्नोदयते प्रभापरिकरः श्रीभास्करो भासयस-
तावद्धारयतीह पंकजवनं निद्रातिभारश्रमम् |
यावत्वच्चरणद्वयस्य भगवन् स्यात्प्रसादोदयः
तावज्जीवनिकाय एष वहति प्रायेण पापं महत् |७|

शान्ति शान्तिजिनेन्द्र शान्तमनसस्त्वत्पाद्पद्माश्रयात्
संतप्ताः पृथ्वीतलेषु बहवः शान्त्यर्थिनः प्राणिनः |
कारुण्यान्ममभाक्तिकस्य च विभो दृष्टिं प्रसन्नां कुरु
त्वत्पादद्वयदैवतस्य गदतः शान्त्यष्टकं भक्तितः |८|